# Shri Nrisimha Mala Mantra

# श्रीनृसिंहमालामन्त्रः

## Document Information

Text title : Nrisimha Mala Mantra

File name : nRisiMhamAlAmantra.itx

Category : vishhnu, dashAvatAra, mAlAmantra, mantra

Location : doc_vishhnu

Proofread by : NA

Latest update : February 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2023

*sanskritdocuments.org*

# श्रीनृसिंहमालामन्त्रः

श्रीगणेशाय नमः ।
अस्य श्रीनृसिंहमालामन्त्रस्य नारदभगवान् ऋषिः ।
अनुष्टुप्छन्दः । श्रीनृसिंहदेवता । आं बीजम् ।
लं शक्तिः । मेरुकीलकम् ।
श्रीनृसिंहप्रीत्यर्थे जपे विनियोगः ॥

ॐ नमो नृसिंहाय ज्वालामुखाग्निनेत्राय
शङ्खचक्रगदाप्रहस्ताय । योगरूपाय
हिरण्यकशिपुच्छेदनान्त्रमालाविभूषणाय
हन हन दह दह वच वच रक्ष वो
नृसिंहाय पूर्वदिशां बन्ध बन्ध
रौद्ररभसिंहाय दक्षिणदिशां बन्ध बन्ध
पावननृसिंहाय पश्चिमदिशां बन्ध बन्ध
दारुणनृसिंहाय उत्तरदिशां बन्ध बन्ध
ज्वालानृसिंहाय आकाशदिशां बन्ध बन्ध
लक्ष्मीनृसिंहाय पातालदिशां बन्ध बन्ध
कः कः कम्पय कम्पय आवेशय आवेशय
अवतारय अवतारय शीघ्रं शीघ्रम् ॥

ॐ नमो नारसिंहाय नवकोटिदेवग्रहोच्चाटनाय ।
ॐ नमो नारसिंहाय अष्टकोटिगन्धर्वग्रहोच्चाटनाय ।
ॐ नमो नारसिंहाय सप्तकोटिकिन्नरग्रहोच्चाटनाय ।
ॐ नमो नारसिंहाय षट्कोटिशाकिनीग्रहोच्चाटनाय ।
ॐ नमो नारसिंहाय पञ्चकोटिपन्नगग्रहोच्चाटनाय ।
ॐ नमो नारसिंहाय चतुष्कोटिब्रह्मराक्षसग्रहोच्चाटनाय ।
ॐ नमो नारसिंहाय द्विकोटिदनुजग्रहोच्चाटनाय ।
ॐ नमो नारसिंहाय एककोटिग्रहोच्चाटनाय ।

ॐ नमो नारसिंहाय अरिमुरिचोरराक्षसजितिः वारं
वारम् । श्रीभय चोरभय व्याधिभय
सकलभयकण्टकान् विध्वंसय विध्वंसय ।
शरणागत वज्रपञ्जराय विश्वहृदयाय
प्रह्लादवरदाय क्ष्रौं श्रीं नृसिंहाय स्वाहा ।
ॐ नमो नारसिंहाय मुद्गलशङ्खचक्रगदापद्महस्ताय
नीलप्रभाङ्गवर्णाय भीमाय भीषणाय
ज्वालाकरालभयभाषित
श्रीनृसिंहहिरण्यकशिपुवक्षस्थलविदारणाय
जय जय एहि एहि भगवन् भगवन् गरुडध्वज
गरुडध्वज मम सर्वोपद्रवं वज्रदेहेन चूर्णय
चूर्णय आपत्समुद्रं शोषय शोषय ।
असुरगन्धर्वयक्षब्रह्मराक्षसभूतप्रेतपिशाचादीन्
विध्वंसय विध्वंसय । पूर्वाखिलं मूलय मूलय ।
प्रतिच्छां स्तम्भय परमन्त्र परयन्त्र परतन्त्र
परकष्टं छिन्दि छिन्दि भिन्दि भिन्दि हुं फट् स्वाहा ।

इति श्रीअथर्वणवेदोक्त नृसिंहमालामन्त्रः समाप्तः ॥

श्रीनृसिंहार्पणमस्तु ॥

श्रीलक्ष्मीनृसिंहमालामन्त्रः

*Shri Nrisimha Mala Mantra*

pdf was typeset on February 28, 2023

Please send corrections to *sanskrit@cheerful.com*